*Quest Journals*
*Journal of Research in Humanities and Social Science*
*Volume 5 ~ Issue 8 (2017)pp: 73-81*
*ISSN(Online):2321-9467*
*www.questjournals.org*

**Research Paper**

# श्रीमद्भागवतमहापुराणान्तर्गत-द्वितीयस्कन्धस्थप्रथमाध्यायस्य विशिष्टतिङन्तकृदन्तक्रियापदानां परिशीलनम्

**नीरज नौटियाल,**
शोधच्छात्रः , श्री.ला.ब.शा.रा.सं. विद्यापीठम्,
कटवारिया सरायः, नवदेहली-110016

**'विद्यावतां भागवते परीक्षा'** इत्येतद्दृष्ट्या वक्तुं शक्यते यत् यद्भागवतनामेदं शास्त्रं नानाविद्याकोशो वर्तते। भक्तिशास्त्रदृष्ट्या त्वस्य महत्त्वं सर्वे जान्त्येव। भगवता द्वैपायनेन व्यासेन अस्मिन् महापुराणे तत्सर्वं समुपनिबद्धं येन नरो नारायणमयः सम्पद्येत। यथा दार्शनिका अत्र दार्शनिकतत्त्वानि अनुसंदधते, साहित्यिका अत्र नानारसालङ्कारादिसामग्रीः लभन्ते तथैव वैयाकरणा अपि सर्वत्र स्वकीयां मनोभिलषितां शब्दशास्त्रीयं सामग्रीं लब्धुमर्हन्ति। वयं जानीमो यत् क्रियावाचिनो भवन्ति धातवः, तेभ्यो धातुभ्यः नानाशब्दसम्पदा व्युत्पाद्यते। एवमेव विना क्रियापदं वाक्यं पूर्णतां न प्राप्तुमर्हति। तस्मादत्र शोधेलेखे द्वितीयस्कन्धे प्रथमाध्यायस्य कानिचिद् विशिष्टानि तिङन्तानि कृदन्तानि च क्रियापदानि च विचार्यन्ते, भागवतशास्त्रं रत्नाकरसदृशं विशालं वर्तते। अतो हेतोः केवलमेक एव अध्यायः क्रियापदानामालोडनाय अस्माभिः चितः।

क्रियापदानां द्वैविध्यम् – अत्र क्रियापदविमर्शप्रसङ्गे इदं वक्तुं शक्यते यद् द्विविधं क्रियापदं भवितुमर्हति तिङन्तं कृदन्तञ्चेति। यद्यपि **'सर्वाणि नामान्याख्यातजानि'**[1] इति नैरुक्तानां वैयाकरणानाञ्च विशिष्टो वर्तते सिद्धान्तः। तथाप्यत्र केवलं तेषामेव कृदन्तानां क्रियापदानामुल्लेखो विधीयते यानि क्रियापदत्वेन भासन्ते।

**तिङन्तपदविमर्शः** – (क) अस्मिन् अध्याये लटः लिङश्च रूपाणाम् आधिक्यं वर्तते

क्विचिदेव लुङश्च लिटश्च लृटश्च लङ्गश्च रूपं प्राप्तुं शक्यते। तेषां विवरणमधः प्रस्तूयते।

**लट्-प्रयोगविमर्शः** – वर्तमाने लट्[2]। इति सूत्रस्य वर्तमानकालिकप्रयोगाणां कृते प्रयोगो भवति। अत्रायं विशेषो यत् लटः प्रयोगाः न केवलं कर्तृवाच्ये अपितु कर्मवाच्येऽपि प्राप्तुं शक्यन्ते। आत्मनेपदप्रयोगाश्चापि अत्र लभ्यन्ते। संक्षेपेण विवरणमिह प्रस्तूयते -

**'सन्ति'**[3] इति क्रियापदम् **'अस्-भुवि'** 'भूवादयो धातवः '[4] ' वर्तमाने लट् '[5] 'लः परस्मैपदम् '[6] 'तिप्तस्झि...'[7] ' शेषे प्रथमः '[8] 'बहुषु बहुवचनम्'[9] 'उपदेशेऽजनुनासिक इत्'[10] 'तस्य लोपः' 'लः कर्मणि चाभावे चाकर्मकेभ्यः '[11] 'तान्येकवचनद्विवचनबहुवचनान्येकशः'[12] 'अदिप्रभृतिभ्यः शपः'[13] इत्यादिभिः सूत्रैः प्रक्रियाकार्यं विधाय 'अस्- अन्ति' इति स्थितौ पुनश्च **'सार्वधातुकमपित्'**[14] **'श्नसोरल्लोपः'**[15] अस् इत्यस्य अकारस्य लोपे, 'स्-

[1] यास्कनिरुक्तम्, अध्यायः-1,पादः-4, प्रकाशनम्, विद्याभवन संस्कृत सीरीज्, पटना
[2] पा.अष्टा.-3.2.123
[3] श्रोतव्यादीनि राजेन्द्र नृणां सन्ति सहस्रशः।
अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनाम्।।, श्री.भा.महा.पु.-2.1.2
[4] पा.अ.1.3.1
[5] पा.अ. 3.2.123
[6] पा.अ.1.4.99
[7] पा.अ.3.4.78
[8] पा.अ.1.4.108
[9] पा.अ. 1.4.2
[10] पा.अ. 1.3.2
[11] पा.अ. 3.4.69
[12] पा.अ.1.4.102
[13] पा.अ.2.4.72
[14] पा.अ. 1.2.4
[15] पा.अ.6.4.111

अन्ति' इत्यवस्थायां 'नश्चापदान्तस्य झलि'[1] 'अनुस्वारस्य ययि परसवर्णः '[2] इति सूत्रैः विविधप्रक्रियासम्बद्धानि कार्याणि विधाय 'सन्ति' इति क्रियापदं निष्पद्यते, अत्र 'सन्ति' इति क्रियया सह केषां पदानामन्वयो वर्तते ? तत्रोच्यते - श्रोतव्यादीनि इत्यनेन पदेन, केषां किं सन्ति ? नृणां मनुष्याणां सन्ति। अत्र श्रोतव्यानि इति पदं कर्तृपदरूपेण वर्तते, तिङा श्रोतव्यानि इति पदमभिहितं तस्मादत्राभिहिते प्रथमा इति नियमेन प्रथमाविभक्तिर्जाता। अत एव पूर्णतयान्वयसहितं वाक्यमेवमस्ति यद्- गृहमेधिनामात्मतत्त्वमपश्यतां सहस्रशः (कर्माणि) श्रोतव्यानि सन्तीति।

**पश्यति**[3] **-** दृशिर्-प्रेक्षणे [4], इत्यस्माद् धातोः वर्तमाने लटलकारे प्रथमपुरुषैकवचने **'पाघ्राध्मास्थाम्नादाणदृश्यर्तिशर्तिशदसदांपिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः'**[5] इति सूत्रेण दृश्-स्थाने पश्यादेशे रूपमिदं निष्पद्यते।अत्र पश्यति इति क्रियापदस्यार्थो वर्तते यद् आत्मतत्त्वं न पश्यति इत्यर्थः।

प्रसीदति[6] – प्र उपसर्ग पूर्वकात् 'शदलृ-विशरणगत्यवसादनेषु [7] , इति धातोः लटि रूपमिदं निष्पद्यते। अस्य तात्पर्यं भवति तुष्यतीति। इत्यत्र विष्णोः पदस्य मनः प्रसादरूपं फलमनेन प्रयोगेण प्रदर्शितम्।

**हन्ति**[8] -हन्-हिंसागत्योः '[9]धातोः लट्-लकारे प्रथमपुरुषबहुवचने रूपमिदं निष्पद्यते। अत्र रजस्तमोभ्यां यो मल उत्पद्यते तस्य हनने तात्पर्यात् प्रयोगोऽयमुत्पद्यते।

**पठन्ति**[10] **- पठ्-व्यक्तायां वाचि'**[11] इत्यस्माद् धातोः लटि प्रथमपुरुषे बहुवचनान्तं रूपमिदम् अत्र स्तुवन्तीत्यस्मिन्नर्थे प्रयोगः कृतः।

**आमनन्ति**[12] - आङ् उपसर्गपूर्वकाद् म्ना-अभ्यासे [13] इत्यस्माद् धातोः वर्तमाने लट्लकारे प्रथमपुरुषबहुवचनरूपमिदं वर्तते। विज्ञानशक्तिमहिमामनन्ति इत्यत्र प्रयोगः कृतः।

**आहुः**[14] **-** ब्रूञ्- व्यक्तायां वाचि, [15] इत्यस्मात् धातोः, प्रथमपुरुषे बहुवचने वैकल्पिकं रूपमिदं **'ब्रुवः पञ्चानामादित आहो ब्रुवः '**[16] इत्यनेन ब्रवः स्थाने आहादेशे सिद्धमिदं रूपम्।

**गृहन्ति**[17] **-** गॄ-शब्दे [1] इत्यस्माद् धातोः लटि प्रथमपुरुषबहुवचनान्तं रूपमिदम्। अत्र साधकाः अतलादिलोकान् विश्वमूर्त्तेः भगवतो नानाङ्गरूपेण स्तुवन्ति इति तात्पर्येण क्रियापदमिदं प्रयुक्तम्।

---

[1] पा.अ.8.3.24
[2] पा.अ.8.4.58
[3] देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि
तेषां **प्रमत्तो** निधनं पश्यन्नपि न **पश्यति**।। श्री.भा.महा.पु.-2.1.4
[4] पा.धातु.पा.-1.188
[5] पा.अष्टा.-7.3.78
[6] तत्रैवावयवं ध्यायेदव्युच्छिन्नेन चेतसा।
मनो निर्विषयं युङ्क्त्वा ततः किञ्चन न स्मरेत्।
पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति।। श्री.भा.महा.पु.-2.1.19
[7] पा.धातु.पा.- 1.190
[8] रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः।
यच्छेद् धारणया धीरो हन्ति या तत्कृतं मलम्।। श्री.भा.महा.पु.-2.1.20
[9] पा.धातु.पा.-2.2
[10] पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम्।
महातलं विश्वसृजोऽथ गुल्फौ तलातलं वै पुरुषस्य जङ्घे।। श्री.भा.महा.पु.-2.1.26
[11] पा.धा.पा.-1.381
[12] विज्ञानशक्तिं महिमामनन्ति सर्वात्मनोऽन्तःकरणं गिरित्रम्।
अश्वाश्वतर्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणिदेशाः।। श्री.भा.महा.पु.-2.1.35
[13] पा.धा.पा.- 1.929
[14] ईशस्य केशान् विदुरम्बुवाहान् वासस्तु सन्ध्यां कुरुवर्य भूम्नः।
अव्यक्तमाहुर्हृदयं मनश्च स चन्द्रमाः सर्वविकारकोशः।। श्री. भा.महा.पु.-2.1.34
[15] पा.धातु.पा.- 2.39
[16] पा.अष्टा.-3.4.84
[17] द्वे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलं चातलं च।

**लट्लकारात्मनेपदप्रयोगाः –**

**'रमन्ते'**[2] इति तिङन्तक्रियापदं **'रमु-क्रीडायाम्'**[3] इत्यस्माद् धातोः वर्तमाने लटि झप्रत्यये च कृते पुनश्च 'कर्तरि शप् '[4] शपि, 'तिङ्शित्सार्वधातुकं'[5] सार्वधातुकसंज्ञायां 'झोऽन्तः'[6] झकारस्यान्तादेशे 'अतो गुणे '[7] पररूपमेकादेशे 'अचोऽन्त्यादि टिः '[8] टिसंज्ञायां 'टित आत्मने पदानां टेरे'[9], इत्यनेन टेरेत्वे, रमन्ते इति रूपं निष्पद्यते। के रमन्ते? अथवा रमन्ते इति क्रियापदस्य कर्तृरूपेण किं पदं वरिवर्ति, इति जिज्ञासायामुक्तं प्रकृतपद्ये यत् नैर्गुणस्था विधिषेधतो निवृत्ताः मुनयो रमन्ते इति, संक्षेपेण वक्तुं शक्यते यत् निवृत्तिमार्गानुगामिनो भगवदाराधनतत्पराः सन्तः अथवा मानवाः एव परमात्मनि रमन्ते।

**सम्पद्यते**[10] – समुपसर्गपूर्वात् पद्-गतौ[11], इत्यस्माद् धातोः प्रथमपुरुषैकवचने रूपमिदं निष्पद्यते। आशु सम्पद्यते योगः इत्यत्र सम्पन्नो भवतीति तात्पर्येण प्रयोगोऽयं कृतः।

**कर्मवाच्यप्रयोगाः –**

अत्र लटि केचन कर्मवाच्यप्रयोगा अपि सन्ति तेषामप्युल्लेखोऽत्र क्रियते।

**'ह्रियते'**[12] इति क्रियापदमत्र **'हृञ्-हरणे'**[13] इत्यस्माद्धातोः, कर्मणि भावे च 'लः कर्मणि चाभावे चाकर्मकेभ्यः '[14] **'सार्वधातुके यक्'**[15] लटि तिपि यकि च कृते, कर्मवाच्ये भाववाच्ये च क्रियापदस्यात्मनेपदत्वं विधियते, **'टित आत्मनेपदानां टेरे'**[16] इति शास्त्रे टेरेत्वे विहिते 'ह्रियते' रूपमिदं साधु। 'ह्रियते' इत्युक्तानुक्तव्यवस्थया नक्तमिति कर्मपदं , तथा च निद्रेति, कर्तृपदं यथाशास्त्रं तिङ्गा नक्तमभिहितः, ततोऽभिहिते प्रथमा इत्यनेन **'नक्तम्'**[17] इति प्रथमान्तमव्ययपदं निद्रा चेति पदमत्रानभिहितमनभिहिते कर्तृकरणयोः तृतीयाविभक्तिः **'कर्तृकरणयोस्तृतीया'**[18] इत्यनेन विधीयते। ततो निद्रा इत्यस्य 'निद्रया' इति जातम्।

सांसारिकैः रात्रिकालः कथं व्ययीक्रियते तर्ह्युक्तं यद् निद्रया व्यवायेन (रतिक्रीडादिभिः) च कालक्षेपः क्रियते। दिनं कथं ह्रियते ?तत्रोक्तं कुटुम्बभरणेन ह्रियते, इत्थं 'ह्रियते' इति तिङन्तक्रियापदस्यान्वयः दिवा रात्रिकालेन चोभाभ्यां क्रियते।

---

महीतलं तज्जघनं महीपते नभस्यलं नाभिसरो गृणन्ति॥श्री.भा.महा.पु.-2.1.27

[1] पा.धातु.पा.-9.33

[2] प्रायेण मुनयो राजन् निवृत्ता विधिषेधतः।
नैर्गुण्यस्था **रमन्ते** स्म गुणानुकथने हरेः॥ श्री.मद्.भा.महा.पु.-2.1.7

[3] पा.धा.पा.1.989

[4] पा.अष्टा.3.1.68

[5] पा.अष्टा.-3.4.113

[6] पा.अ.-7.1.3

[7] पा.अ.- 6.1.97.

[8] पा.अ. -1.1.64

[9] पा.अ.3.4.79

[10] यस्यां सन्धार्यमाणायां योगिनो भक्तिलक्षणः।
आशु सम्पद्यते योग आश्रयं भद्रमीक्षतः॥श्री.भा.महा.पु.-2.1.21

[11] पा.धातु.पा.-4.65

[12] निद्रया **ह्रियते** नक्तं व्यवायेन च वा वयः।
दिवा चार्थेहया राजन् कुटुम्बभरणेन वा॥ श्री.भा.महा.पु.-2.1.3

[13] पा.धा.पा. – 1.899

[14] पा.अष्टा.-3.4.69

[15] पा.अष्टा.-3.1.67

[16] पा.अष्टा.-3.4.79

[17] निद्रया ह्रियते **नक्तं** व्यवायेन च वा वयः।
दिवा चार्थेहया राजन् कुटुम्बभरणेन वा॥ श्री.भा.महा.पु.-2.1.3

[18] पा.अष्टा.-2.3.18

**सन्धार्यते**[1] – अत्र अनेकधातवः कल्पयितुं शक्यन्ते यथा ‘धृङ्-अवस्थाने’[2] ‘धृञ्-धारणे’[3] ‘धृङ्-अवबन्धने’[4] अनेकविधोऽयं धातुः समुपसर्गपूर्वको वर्तते। णिजन्तस्य धातोः कर्मणि यकि ‘त’प्रत्यये निष्पन्नमिदं रूपम्। सन्धार्यते इत्यस्य कर्म वर्तते धारणेति।

**दृश्यते**[5] – दृशिर्-प्रेक्षणे[6] इत्यस्माद् धातोः ,लटि तिपि यकि त-प्रत्यये च रूपमिदं निष्पन्नम्। यस्य विश्वं भूतं भव्यं भवच्च तत् इति सर्वं कर्मत्वेन अन्वेति।

**लिट्प्रयोगविमर्शः -**

परोक्षे लिट्[7] परोक्षभूतकालाय लिट्-लकारस्य प्रयोगो भवति। अस्मिन् अध्याये आदावेव ‘शुक उवाच’ इति प्रयोगो वर्तते। अत्र पुराणादिषु ग्रन्थेषु उवाच इति प्रसिद्धः प्रयोगः। प्रयोगोऽयं ब्रूञ् – व्यक्तायां वाचि[8], वच परिभाषणे[9], इत्येताभ्यां धातुभ्यां प्रयोगोऽयं निष्पद्यते।

**लृट्-प्रयोगविमर्शः –**

लृट् शेषे च[10], इति भविष्यकालस्य कृते लृट्-लकारः प्रयुज्यते।

**अभिधास्यामि**[11] – अभि-उपसर्गपूर्वकात् डुधाञ्-धारणपोषणयोः [12] इत्यस्माद् धातोः लृट्-लकारोत्तमपुरुषैकवचने रूपमिदं निष्पद्यते। अत्र अभिधास्यामि इत्यस्यार्थो कथयिष्यामीति वर्तते।

**लिङ्प्रयोगविमर्शः** – विधिनिमन्त्रामन्त्राधीष्टसम्प्रश्नप्रार्थनेषु लिङ्[13] – एतेषु विध्यादिषु अर्थेषु धातोः लिङ्लकारो भवति, एतत् लिङ्विधायकं सूत्रं वर्तते। अत्र लिङ्विषयकाः प्रयोगाः पर्याप्ताः सन्ति। अत्रेदमप्यवधेयं यत् सर्वे प्रयोगाः प्रायशः प्रथमपुरुषैकवचनान्ताः सन्ति।

**अभ्यषेत्**[14] – अभ्युपसर्गपूर्वकात् असु-क्षेपणे [15] इति धातोः लिङ्-रूपमिदम्। अभ्यषेत् मनसा शुद्धम् इत्यस्मिन् प्रयोगे अभ्यासं कुर्यादिति तात्पर्येण प्रयोगोऽयं महर्षिणा कृतः।

**यच्छेत्**[16] भ्वादिगणे यमु- उपरमे इत्यस्माद् धातोः ‘इषुगमियमां छ ’[17] इत्यनेन छान्तादेशे तुगागमे श्चुत्वे लिङि रूपमिदम्। उपरमेत इति तात्पर्यात् प्रयोगोऽयं संगच्छते तथैव नि-उपसर्ग-पूर्वकाद् नियच्छेद्[18] इति रूपमपि निष्पद्यते।

---

[1] यथा सन्धार्यते ब्रह्मन् धारणा यत्र सम्मता।
यादृशी वा हरेदाशु पुरुषस्य मनोमलम्।। श्री.भा.महा.पु.-2.1.22

[2] पा.धातु.पा.-6.148

[3] पा.धातु.पा.-1.900

[4] पा.धातु.पा.-1.960

[5] विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम्।
यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च सत्। श्री.भा.महा.पु.-2.1.24

[6] पा.धातु.पा.-1.988

[7] पा.अष्टा.3.2.115

[8] पा.धातु.-2.39

[9] पा.धातु.-2.8

[10] पा.अष्टा.-

[11] तदहं तेऽभिधास्यामि महापौरुषिको भवान्।
यस्य श्रद्दधतामाशु स्यान्मुकुन्दे मतिः सती। श्री.भा.महा.पु.-2.1.10

[12] पा.धातु.-3.11

[13] पा.अष्टा.-3.3.161

[14] अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम्।
मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन्।। श्री.भा.महा.पु.-2.1.17

[15] पा.धातु.-4.106

[16] अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम्।
मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन्।। श्री.भा.महा.पु.-2.1.17

[17] पा.अष्टा.-7.3.77

[18] नियच्छेद् विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः।
मनः कर्मभिराक्षिप्तं शुभार्थे धारयेत् धिया।। श्री.भा.महा.पु.-2.1.18

**धारयेत्**[1] – भ्वादिगणे धृञ्-धारणे, धृ- अवस्थाने, धृङ्- अवबन्धने वा इत्यस्माद् धातोः णिचि लिङि रूपमिदं निष्पद्यते। तथैव समुपसर्गपूर्वकात् सन्धार्यते इत्यपि रूपं निष्पद्यते।

**ध्यायेद्**[2] – ध्यै चिन्तायां[3] भ्वादिगणे इत्यस्माद्धातोः रूपमिदं निष्पद्यते। तत्रैकावयवं ध्यायेत् इत्यत्र ध्यानार्थं साधकं प्रेरयेत्।

**स्मरेत्**[4] **-** स्मृ आध्याने[5], स्मृ- चिन्तायां[6] वा इत्यस्माद्धातोः रूपमिदं निष्पद्यते। अत्र किञ्च न स्मरेत् इति निषेधात्मकः प्रयोगः।

**भजेत्**[7] – भज्-सेवायाम्[8] इत्यस्माद् धातोः रूपमिदं निष्पद्यते। अत्र तं सत्यमानन्दनिधिं भजेत् इत्यत्र सेवेत इति तात्पर्यात् प्रयोगोऽयं कृतः।

**सज्जेत्**[9] – सज्ज्-गतौ[10] इत्यस्मात् धातोः प्रयोगोऽयं निष्पादयितुं शक्यते। नान्यत्र सज्जेत् इत्यत्र भ्रामयेत् इति तात्पर्यात् प्रयोगोऽयं कृतः।

**छिन्द्यात्**[11] - छिद्-छिदिर्-द्वैधीकरणे[12] , इत्येताभ्यां धांतुभ्यां रूपमिदं निष्पद्यते। छिन्द्याद् असङ्गशस्त्रेण स्पृहाम् इत्यत्र स्पृहानाशाय प्रयोगोऽयं विहितः।

**हरेत्**[13] **-** हृञ्-हरणे[14] इत्यस्माद् धातोः रूपमिदं निष्पद्यते। हरेदाशु पुरुषाया मनोमलम् इत्यत्र प्रयोगोऽयं दृश्यते।

**घटेत्**[15] – 1 घट् –चेष्टायाम्[16], इत्यस्माद् धातोः आत्मनेपदरूपमिदं निष्पद्यते।

**लुङ्-प्रयोगविमर्शः** – लुङ्[17] भूतकालं द्योतयितुं धातोः लुङ्लकारो भवति।

**अभूत्**[18] **-** भू-सत्तायाम्,[1] इत्यस्माद्धातोः लुङ्-लकार-प्रथमपुरुषैकवचने रूपमिदं निष्पद्यते।

---

[1] तत्रैकावयवं ध्यायेद्व्युच्छिन्नेन चेतसा।
मनो निर्विषयं युङ्क्त्वा ततः किञ्चन न स्मरेत्।
पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति।। श्री.भा.महा.पु.-2.1.19
[2] तत्रैकावयवं ध्यायेद्व्युच्छिन्नेन चेतसा।
मनो निर्विषयं युङ्क्त्वा ततः किञ्चन न स्मरेत्।
पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति।। श्री.भा.महा.पु.-2.1.19
[3] पा.धातु.-1.908
[4] तत्रैकावयवं ध्यायेद्व्युच्छिन्नेन चेतसा।
मनो निर्विषयं युङ्क्त्वा ततः किञ्चन न स्मरेत्।
पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति।। श्री.भा.महा.पु.-2.1.19
[5] पा.धातु.-1.807
[6] पा.धातु.-1.933
[7] स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः।
तं सत्यमानन्दनिधिं भजेत नान्यत्र सज्जेद् यत आत्मपातः।। श्री.भा.महा.पु.-2.1.39
[8] पा.धातु.पा.- 1.998
[9] स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः।
तं सत्यमानन्दनिधिं भजेत नान्यत्र सज्जेद् यत आत्मपातः।। श्री.भा.महा.पु.-2.1.39
[10] पा.धातु.- 1.229
[11] अन्तकाले तु पुरुष आगते गतसाध्वसः।
छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम्।।2.1.15
[12] पा.धातु.पा.-7.3,10.469
[13] यथा सन्धार्यते ब्रह्मन् धारणा यत्र सम्मता।
यादृशी वा हरेदाशु पुरुषस्य मनोमलम्।। श्री.भा.महा.पु.-2.1.22
[14] पा.धातु.पा.-1.899
[15] किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह।
वरं मुहूर्तं विदितं घटेत श्रेयते यतः।। श्री.भा.महा.पु.-2.1.12
[16] पा.धा.पा.-1.763
[17] पा.अ.3.2.110
[18] द्यौरक्षिणी चक्षुरभूत् पतङ्गः पक्ष्माणि विष्णोरहनी उभे च।

**कृदन्तपदविमर्शः** – यद्यपि कृदन्तपदानां क्षेत्रं विशालं वर्तते तथाप्यत्र केषाञ्चित् प्रमुखाणां तव्यत्, क्त, क्तवतु शतृ शानच् प्रत्ययघटितानां क्रियापदानां विवरणं प्रस्तूयते।

**1.तव्यत्प्रयोगाः -** 'तव्यत्तव्यानीयरः'[2] इत्यनेन सूत्रेण कृत्यसंज्ञकाः इमे प्रत्ययाः भावे कर्मणि च प्रयुज्यन्ते।

**'श्रोतव्यः'**[3] **'कीर्तितव्यः'**[4] **स्मर्तव्यश्च**[5] इत्येतानि क्रियापदानि सन्ति। अत्र सर्वादौ श्रोतव्य इत्यस्य कृदन्तक्रियापदस्य विश्लेषणं क्रियते - **'श्रूञ्-श्रवणे'**[6], 'धातोः'[7] 'तव्यत्तव्यानीयरः'[8] 'आर्धधातुकं शेषः'[9] चेत्येतैः इत्यादिशास्त्रैः कार्यं विधाय पुनश्च 'सार्वधातुकार्धधातुकयोः'[10] इत्यनेन शास्त्रेण इगन्तस्याङ्गस्य गुणे विहिते पदत्वसंस्कारार्थं स्वादिकार्ये विहिते 'श्रोतव्य' इति रूपं सिद्धम्। कृत्यप्रत्ययाः कर्मणि भावे च भवन्ति 'तयोरेव कृत्यक्तखलर्थाः'[11] इति नियमेन तयोरित्युक्ते भावकर्मणोरेव इति।

**'कीर्तितव्यः'** इति कृदन्तक्रियापदं चौरादिकात् **'कॄत-संशब्दने'**[12] धातोः **'तव्यत्तव्यानीयरः'**[13] इत्यनेन तव्यप्रत्यये, 'उपधायाश्च'[14] इत्त्वे, रपरत्वे, 'उपधायाञ्च'[15] अनेन उपधादीर्घत्वे, आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः'[16] इडागमे स्वादिकार्येषु च विहितेषु 'कीर्तितव्य' इति रूपं निष्पद्यते। कः कीर्तितव्यः? हरिः कीर्तितव्यः, हरि इति पदमत्र तव्यत्प्रत्ययेनाभिहितः तस्मादभिहिते प्रथमेति नियमेन हरिपदं प्रथमान्तं जातम्।

**'स्मर्तव्यः'** इत्यत्र **'स्मृ-आध्याने'**[17] इत्यस्माद्धातोः तव्यत्-प्रत्यये, अनिट्त्वात् इडभावे इगन्तस्याङ्गस्य गुणे,रपरत्वे निष्पन्नम्। पूर्वोक्तानुसारमेवास्यापि विश्लेषणं वर्तते। जीवस्य स्मरणेऽपि सदैव हरिरेव भवेदित्यभिप्रायः, हरति दुःखानि, हरति पापानि वेति हरिः। हरिस्मरणेनैव जीवो भयमुक्तो भवितुमर्हति, नान्योपायः तत्र विद्यते, उक्तं यथा - '**हरिस्मृतिः सर्वविपद्विमोक्षणम्**[18]'इति।

**क्त-प्रयोगाः** – क्तक्तवतू निष्ठा[19] इत्यनेन सूत्रेण निष्ठाप्रत्ययौ भूतकालार्थे भवतः।

**कृतः**[20] **-** डुकृञ्-करणे इत्यस्मात् धातोः भूते निष्ठा इत्यनेन सूत्रेण क्तप्रत्ययेन रूपमिदं निष्पद्यते।

**निर्णीतम्**[21] - णीञ्-प्रापणे[1] - इत्यमाद् धातोः निष्ठायां क्तप्रत्ययेन रूपमिदं निष्पद्यते।

---

तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमापोऽस्य तालू रस एव जिह्वा।। श्री.भा.महा.पु.-2.1.30
[1] पा.धातु.पा.-1.1
[2] पा.अष्टा.-3.1.96
[3] तस्मात् भारतसर्वात्मा भगवान् हरिरीश्वरः।
**श्रोतव्यः** कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभययम्।। श्री.भा.महा.पु.-2.1.5
[4] तस्मात् भारतसर्वात्मा भगवान् हरिरीश्वरः।
श्रोतव्यः **कीर्तितव्यश्च** स्मर्तव्यश्चेच्छताऽभययम्।। श्री.भा.महा.पु.-2.1.5
[5] तस्मात् भारतसर्वात्मा भगवान् हरिरीश्वरः।
श्रोतव्यः कीर्तितव्यश्च **स्मर्तव्यश्चेच्छ**ताऽभययम्।। श्री.भा.महा.पु.-2.1.5
[6] पा.धा.पा.-1.942
[7] पा.अष्टा.3.1.91
[8] पा.अष्टा.-3.1.96
[9] पा.अष्टा.-3.4.114
[10] पा.अष्टा.-7.4.84
[11] पा.अष्टा. 3.4.70,
[12] पा.धा.पा.-धातुसंख्या,1654.चौखम्भासंस्कृतसीरीज,
[13] पा.अष्टा. 3.1.96
[14] पा.अष्टा. 7.1.101
[15] पा.अष्टा. -8.2.8
[16] पा.अष्टा. 7.2.35
[17] पा.धा.पा. 1.807
[18] श्रीमद्भागवतमहापुराणम् - स्कन्धः-8,अध्यायः -10
[19] पा.अष्टा.-1.1.26
[20] वरीयानेष ते प्रश्नः कृतो लोकहितं नृपः।
आत्मवित्संमतः पुंसां श्रोतव्यादिषु यः परः।। श्रीमद्.भा.महा.पु.-2.1.1
[21] एतन्निर्विद्यमानानामिच्छतामकुतोभयम्।

**विदितम्**[2] - विद्-ज्ञाने,[3] इत्यस्माद् धातोः क्तप्रत्ययेन रूपमिदं निष्पद्यते।

**आक्षिप्तम्**[4] **-** आङ् उपसर्गपूर्वकात् क्षिप् क्षेपणे[5] - इत्यस्मात् धातोः क्तप्रत्ययेन रूपमिदं निष्पद्यते।

**प्रव्रजितः**[6] **-** प्र-उपसर्गपूर्वकात् व्रज्-गतौ [7] इत्यस्मात् धातोः क्तप्रत्ययेन रूपमिदं निष्पद्यते।

**क्तवतुप्रयोगाः – 'भूते'**[8] **'निष्ठा'**[9] इत्येताभ्यां सूत्राभ्यां भूतकालार्थे धातोः क्तक्तवतुप्रत्ययौ भवतः।

**अधीतवान्**[10] इति भूतकालिकं कृदन्तक्रियापदमध्युपसर्गपूर्वकाद् 'इङ्-अध्ययने' धातोः, 'भूवादयो धातवः' 'भूते'[11] 'निष्ठा'[12] 'क्तक्तवतू निष्ठा'[13] 'अधि इ-क्तवतु ' (अनुबन्धलोपे) 'अधि-इ-तवत् इति स्थितौ 'अकः सवर्णे दीर्घः '[14] पूर्वपरयोर्द्वयोरिकारयोः दीर्घेकारत्वे , अधितवत् इत्यवस्थायां स्वादिप्रत्यये 'अत्वसन्तस्य चाधातोः '[15] इत्यनेन अत्वन्तस्य दीर्घत्वे, 'उगिदचां सर्वनाम '[16]... इत्यादिसूत्रेण नुमि कृते 'अधीतवान्त्' 'संयोगान्तस्य लोपः'[17] पुनश्च 'हल्ङ्याभ्यो दीर्घात्'[18]... इत्यादिसूत्रेण स्वित्यस्य लोपे निष्पद्यते।

अधीतवान्[19] इति क्रियायाः कर्तृत्वेन अहमिति पदं वर्तते, तत्र पद्येऽहमिति पदं तु नास्ति तर्ह्यध्याहारेण, अहमति सार्वनामिकविशेषणस्य अहं शुकदेवाचार्यः। अधीतवान्निति क्रियायाः कर्मपदं किम्? तत्रोच्यते भागवतं पुराणमित्येतानि पदानि कर्मभूतानि वर्तन्ते।

**गतवान्**[20] – गम्लृ – गतौ[21] इत्यस्मात् धातोः क्तवतुप्रत्येन रूपमिदं निष्पद्यते।

**शतृशानच्-प्रयोगाः 'शतृशानचावप्रथमासमानाधिकरणे'**[1] इत्यनेन सूत्रेण परस्मैपदिनो धातोः शतृ तथा च आत्मनेपदिनश्च धातोः शानच् प्रत्ययो भवति। अनयोः प्रत्यययोरपि केचन प्रयोगाः अत्र उल्लिख्यन्ते।

---

योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम्।। श्री.भा.महा.पु.-2.1.11
[1] पा.धातु.पा.-1.901
[2] किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह।
वरं मुहूर्तं विदितं घटेत श्रेयते यतः।। श्री.भा.महा.पु.-2.1.12
[3] पा.धातु.पा.2.59
[4] नियच्छेद् विषयेभ्योऽक्षान्मनसा बुद्धिसारथि।
मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद् धिया।। श्री.भा.महा.पु.-2.1.18
[5] पा.धातु.पा.-6.5
[6] गृहात् प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः।
शुचौ विविक्त आसीनो विधिवत् कल्पितासने।।श्री.भा.महा.पु.-2.1.16
[7] पा.धातु.-1.268
[8] पा.अष्टाध्यायी-3.2.84
[9] पा.अष्टाध्यायी.-3.2.102,
[10] इदं भागवतं नाम पुराणं ब्रह्मसम्मितम्।
अधीतवान्द्वापरादौ पितुर्द्वैपायनादहम्।। श्री.भा.महा.पु.-2.1.8
परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया।
गृहीतचेता राजर्षे आख्यानमयदधीतवान्।।श्री.भा.महा.पु.-2.1.9
[11] पा.अष्टाध्यायी-3.2.84
[12] पा.अष्टाध्यायी.-3.2.102,
[13] पा.अष्टाध्यायी, 1.1.26 ,
[14] पा.अष्टाध्यायी, 6.1.101
[15] पा. अष्टा.-6.4.15
[16] पा. अष्टा.-7.1.70
[17] पा.अष्टा.-8.2.23,
[18] पा.अष्टा.-6.1.68
[19] परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया।
गृहीतचेता राजर्षे आख्यानमय**दधीतवान्**।।श्री.भा.महा.पु.-2.1.9
[20] खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः।
मुहूर्त्तात् सर्वमुत्सृज्य गतवानभयं हरिम्।।श्री.भा.महा.पु.-2.1.13
[21] पा.धातु.पा.-1.982

**पश्यन्**[2] इति क्रियापदं **'दृशिर्-प्रेक्षणे'**[3] इत्यस्माद्धातोः **'वर्तमाने लट्'**[4] लटः स्थाने **'लटः शतृशानचावप्रथमासमानाधिकरणे'**[5] इत्यादिशास्त्रेण शतृ-प्रत्यये, **'पाघ्राध्मास्था'**[6]... इत्यादिसूत्रेण दृश्-स्थाने पश्यादेशे कृते पुनश्च 'उगिदचां सर्वनामस्थानेऽधातोः'[7] इत्यनेन नुमागमे, 'संयोगान्तस्य लोपे'[8] संयोगान्तस्य तकारस्य लोपे कृते 'पश्यन्' इति रूपं सिध्यति, वर्तमानकालिकदर्शनक्रिया इति गम्यते, अत्र मानव इति पश्यन् क्रियया (तिङा) 'प्रमत्तो' इत्यभिहितः तस्मात् कर्तृपदं कः पश्यन् वर्तते, प्राणी पश्यन्नस्ति, वस्तुतोऽप्रथमासमानाधिकरणे इति सूत्रे प्रोक्तं परन्त्वत्र त्वस्ति क्रियया सह पश्यन्नित्यस्य समानाधिकरणत्वं पुनश्च कथमत्र लटः स्थाने शत्रादेशः ततश्च तत्र 'लटः शतृशानचाव'[9]... इत्यादिसूत्रे लट इत्यनुवर्तमानेऽपि पुनश्च सूत्रे लडित्यस्य पुनःकथनं ज्ञापयति यत् क्वचित् 'प्रथमासमानाधिकरणेऽपि (शतृशानचौ)भवति'[10]। अत एव प्रकृते पद्ये **'पश्यन्नपि न पश्यति'**[11] इति पद्यांशे पश्यन्निति प्रथमासमानाधिकरणकः प्रयोगो वर्तते।

**'अपश्यताम्'**[12] इति पदं **'दृशिर्- प्रेक्षणे'**[13] धातोः **'लटः शतृशानचावप्रथमासमानाधिकरणे'**[14] इत्यनेन शतृप्रत्यये विहिते, दृशित्यस्य च **'पाघ्राध्मास्था'**[15]... इत्यादिशास्त्रेण दृशस्स्थाने पश्यादेशे शतृप्रत्ययस्यानुबन्धलोपे पुनश्च 'उगिदचां सर्वनामस्थानेऽधातोः ' इतिसूत्रेण नुमि निषेधार्थकनञ्कृते 'न लोपो नञ्' इति नकारलोपे अपश्यत् इति मूलप्रातिपदिकस्य पुंलिङ्गे षष्ठीबहुवचने अपश्यतामिति पदरूपं जायते। साररूपेण वक्तुं शक्यते यदात्मतत्त्वबोधो गृहमेधिनो दुष्कर एव। भागवतकारेण प्रोक्तं यदीश्वरतत्त्वस्य दर्शनसामर्थ्यं तस्य न्यूनमेव विद्यते, अत एवापश्यतां गृहमेधिनाममित्युक्ते अपश्यन्त आत्मतत्त्वमिति निष्कर्षः।

**शानच्-प्रयोगाः** – आत्मनेपदधातुभ्यः वर्तमानलटः स्थाने शानच्-प्रत्ययो भवति।

**निर्विद्यमानानाम्**[16] **-** निर्-उपसर्गपूर्वकात् विद्-सत्तायाम्[17], इत्यस्माद् धातोः लटः स्थाने शानचि रूपमिदं निष्पद्यते।

**सन्धार्यमाणानाम्**[18] - समुपसर्गपूर्वकात्, धृङ्-अवस्थाने[19] इत्यस्मात् धातोः शानचि रूपमिदं निष्पद्यते।

**आसीनः**[20] **-** आस्- उपवेशने[21], इत्यस्मात् धातोः शानचि रूपमिदं निष्पद्यते।

**क्त्वा-ल्यप्-प्रयोगाः , समानकर्तृकयोः पूर्वकाले , इत्यनेन क्त्वाप्रत्ययो भवति।

---

[1] पा.अष्टा.3.2.124
[2] देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि
तेषां **प्रमत्तो** निधनं पश्यन्नपि न **पश्यति**।। श्री.भा.महा.पु.-2.1.4
[3] पा.धातु.पा.1.188
[4] पा.अष्टा. 3.2.123
[5] पा.अष्टा.3.2.124
[6] पा.अष्टा.7.3.78
[7] पा.अष्टा.-7.1.70
[8] पा.अष्टा.8.3.23
[9] पा.अष्टा.-3.2.124
[10] काशिका,-3.2.124
[11] देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि
तेषां प्रमत्तो निधनं **पश्यन्नपि न पश्यति**।। श्री.भा.महा.पु.-2.1.4
[12] श्रोतव्यादीनि राजेन्द्र नृणां **सन्ति** सहस्रशः।
**अपश्यताम**ात्मतत्त्वं गृहेषु गृहमेधिनाम्।।, श्री.भा.महा.पु.-2.1.2
[13] पा.धा.पा.-1.988
[14] पा.अष्टा.3.2.124
[15] पा.अष्टा. 7.3.78
[16] एतन्निर्विद्यमानानामिच्छतामकुतोभयम्।
योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम्।। श्री.भा.महा.पु.-2.1.11
[17] पा.धातु.पा.-4.70
[18] यस्यां सन्धार्यमाणायां योगिनो भक्तिलक्षणः।
आशु सम्पद्यते योग आश्रयं भद्रमीक्षतः।।श्री.भा.महा.पु.-2.1.21
[19] पा.धातु.पा.-6.148
[20] गृहात् प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः।
शुचौ विविक्त आसीनो विधिवत् कल्पितासने।।श्री.भा.महा.पु.-2.1.16
[21] पा.धातु.-2.11

**क्त्वा-प्रयोगः –**

ज्ञात्वा[2] - ज्ञा-अवबोधने[3] इत्यस्माद् धातोः क्त्वा-प्रत्ययेन रूपमिदं निष्पद्यते।

**ल्यप्प्रयोगः** – समासेऽनञ्पूर्वे क्त्वो ल्यप्[4] इत्यनेन क्त्वास्थाने ल्यप्प्रत्ययो भवति।

**उत्सृज्य[5] -** उदुपसर्गपूर्वकात् सृज्-विसर्गे[6] इत्यस्माद् धातोः ल्यप्-प्रत्ययेन रूपमिदं निष्पद्यते।

**निर्विद्य**[7] - निरुपसर्गपूर्वकात् विद्-ज्ञाने[8] इत्यस्माद् धातोः ल्यपि रूपमिदं निष्पद्यते।

**उपसंहारः -** इत्थमस्माभिः श्रीमद्भागवतमहापुराणस्य द्वितीयस्कन्धस्य प्रथमाध्यायस्य क्रियापददृष्ट्या परिशीलनं कृतम्। अत्र ये विविधाः पक्षाः भवितुं शक्नुवन्ति। तेषां तिङन्तानां, कृदन्तानां च पदानां दृष्ट्या परिशीलनमिदं कृतम्।

अनेन विवरणेन इदं स्पष्टं भवति यत् श्रीमद्भागवतमहापुराणं व्याकरणव्युत्पत्तिदृष्ट्यापि समृद्धं वर्तते केवलमेकस्यैवाध्यायस्य क्रियापददृष्ट्या आलोडनेनेदं विदितं यत् सम्पूर्णभागवतशास्त्रस्य व्याकरणदृष्ट्या परिशीलनं नितान्तमावश्यकम्। इदं भागवतं नामशास्त्रं वस्तुतो महानिधिर्वर्तते। येन न केवलं रसिकाः भक्ताः अपितु दार्शनिकाः, साहित्यिकाः, वैयाकरणाः अन्ये च विद्वांसः आत्मानं कृतार्थयितुमर्हन्ति। क्रियापददृष्ट्या केवलमेकस्य एवास्याध्यायस्य परिशीलनं तु सामान्यनिदर्शनमात्रम्। वक्तुं शक्यते यदस्य महाग्रन्थस्य व्याकरणशास्त्रस्य विविधपक्षदृशा अनुसन्धानम् अध्ययनञ्च अनुसन्धातॄणाम् अध्येतॄणाञ्च कृते सर्वथोपादेयं वर्तते।

---

[1] पा.अष्टा.-3.4.21

[2] खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः।
मुहूर्त्तात् सर्वमुत्सृज्य गतवानभयं हरिम्।।श्री.भा.महा.पु.-2.1.13

[3] पा.धातु.पा.-9.43

[4] पा.अष्टा.-7.1.37

[5] खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः।
मुहूर्त्तात् सर्वमुत्सृज्य गतवानभयं हरिम्।।श्री.भा.महा.पु.-2.1.13

[6] पा.धातु.-6.150

[7] एतन्निर्विद्यमानानामिच्छतामकुतोभयम्।
योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम्।। श्री.भा.महा.पु.-2.1.11

[8] पा.धातु.-2.59